कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥ अथ पञ्चम काण्डे प्रथमः प्रश्नः॥

हरिः ओम्॥ सावित्राणि जुहोति प्रसूत्यै चतुर्गृहीतेन जुहोति चतुष्पादः पशवः पशूनेवाऽव रुन्धे चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति छन्दाग्ंसि देवेभ्योऽपाऽक्रामन्न वोऽभागानि हव्यं वक्ष्याम इति तेभ्य एतच्चतुर्गृहीतमधारयन्पुरोऽनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुर्गृहीतं जुहोति छन्दाग्स्येव तत्प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति यं कामयेत [१] पापीयान्थ्स्यादित्येकैकं तस्य जुहुयादाहुतीभिरेवैनमप गृह्णाति पापीयान्भवति यं कामयेत वसीयान्थ्स्यादिति सर्वाणि तस्याऽनुद्रुत्य जुहुयादाहुत्यैवैनमभि क्रमयति वसीयान्भवत्यथो यज्ञस्यैवैषाऽभिक्रान्तिरेति वा एष यज्ञमुखादृद्ध्या योऽग्नेर्देवताया एत्यष्टावेतानि सावित्राणि भवन्त्यष्टाक्षरा गायत्री गायत्रो- [२] ऽग्निस्तेनैव यज्ञमुखादृद्ध्या अग्नेर्देवतायै नैत्यष्टौ सावित्राणि भवन्त्याहुतिर्नवमी त्रिवृतमेव यज्ञमुखे वि यातयति यदि कामयेत छन्दाग्ंसि यज्ञयशसेनाऽर्पयेयमित्यृचमन्तमां कुर्याच्छन्दाग्स्येव यज्ञयशसेनार्पयति यदि कामयेत यजमानं यज्ञयशसेनाऽर्पयेयमिति यजुरन्तमं कुर्याद्यजमानमेव यज्ञयशसेनाऽर्पयत्यृचा स्तोमग्ं समर्धयेत्या- [३] ह समृद्ध्यै चतुर्भिरभ्रिमा दत्ते चत्वारि छन्दाग्ंसि छन्दोभिरेव देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्या अग्निर्देवेभ्यो निलायत स वेणुं प्राऽविशथ्स एतामूतिमनु समचरद्यद्वेणोः सुषिरग्ं सुषिराऽभ्रिर्भवति स योनित्वाय सयत्रयत्राऽवसत्तत्कृष्णमभवत्कल्माषी भवति

रूपसमृद्ध्या उभयतः क्षणूर्भवतीतश्चाऽमुतश्चाऽर्कस्याऽवरुद्ध्यै व्याममात्री भवत्येतावद्वै पुरुषे वीर्यं वीर्यसम्मिताऽपरिमिता भवत्यपरिमितस्याऽवरुद्ध्यै यो वनस्पतीनां फलग्रहिः स एषां वीर्यावान्फलग्रहिर्वेणुर्वेणवी भवति वीर्यस्याऽवरुद्ध्यै॥[४]

*कामयेत गायत्रीऽर्धयेति च सप्तविग्ंशतिश्च॥**5.1.1***॥

व्यृद्धं वा एतद्यज्ञस्य यदयजुष्केण क्रियत इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमा दत्ते यजुष्कृत्यै यज्ञस्य समृद्ध्यै प्रतूर्तं वाजिन्ना द्रवेत्यश्वमभि दधाति रूपमेवाऽस्यैतन्महिमानं व्याचष्टे युञ्जाथाग्ं रासभं युवमिति गर्दभमसत्येव गर्दभं प्रति ष्ठापयति तस्मादश्वाद्गर्दभोऽसत्तरो योगेयोगे तवस्तरमित्याह [५] योगेयोग एवैनं युङ्क्ते वाजेवाजे हवामह इत्याहाऽन्नं वै वाजोऽन्नमेवाव रुन्धे सखाय इन्द्रमूतय इत्याहेन्द्रियमेवाव रुन्धेऽग्निर्देवेभ्यो निलायत तं प्रजापतिरन्वविन्दत्प्राजापत्योऽश्वोऽश्वेन सं भरत्यनुवित्त्यै पापवस्यसं वा एतत्क्रियते यच्छ्रेयसा च पापीयसा च समानं कर्म कुर्वन्ति पापीयान्– [६] ह्यश्वाद्गर्दभोऽश्वं पूर्वं नयन्ति पापवस्यसस्य व्यावृत्त्यै तस्माच्छ्रेयाग्ंसं पापीयान्पश्चादन्वेति बहुर्वै भवतो भ्रातृव्यो भवतीव खलु वा एष योऽग्निं चिनुते वज्रयश्वः प्रतूर्वन्नेह्यवक्रामन्नशस्तीरित्याह वज्रेणैव पाप्मानं भ्रातृव्यमव क्रामति रुद्रस्य गाणपत्यादित्याह रौद्रा वै पशवो रुद्रादेव [७] पशून्निर्याच्यात्मने कर्म कुरुते पूष्णा सयुजा सहेत्याह पूषा वा अध्वनाग्ं सन्नेता समष्ट्यै पुरीषायतनो वा एष यदग्निरङ्गिरसो वा एतमग्रे देवतानाग्ं समभरन्पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदच्छेहीत्याह सायतनमेवैनं देवताभिः सं भरत्यग्निं

पुरीष्यमङ्गिरस्वदच्छेम इत्याह येन [८] सङ्गच्छते वाजमेवाऽस्य वृङ्क्ते प्रजापतये प्रतिप्रोच्याऽग्निः सम्भृत्य इत्याहुरियं वै प्रजापतिस्तस्या एतच्छ्रोत्रं यद्वल्मीकोऽग्निं पुरीष्यमङ्गिरस्वद्धरिष्याम इति वल्मीकवपामुप तिष्ठते साक्षादेव प्रजापतये प्रतिप्रोच्याऽग्निग्ं सं भरत्यग्निं पुरीष्यमङ्गिरस्वद्धराम इत्याह येन सङ्गच्छते वाजमेवाऽस्य वृङ्क्तेऽन्वग्निरुषसामग्र- [९] मख्यदित्याहानुऽख्यात्या आगत्य वाज्यध्वन आक्रम्य वाजिन्पृथिवीमित्याहेच्छत्येवैनं पूर्वया विन्दत्युत्तरया द्वाभ्यामा क्रमयति प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पशवः प्र जायन्ते द्यौस्ते पृष्ठं पृथिवी सधस्थमित्याहैभ्यो वा एतं लोकेभ्यः प्रजापतिः समैरयद्रूपमेवाऽस्यैतन्महिमानं व्याचष्टे वज्री वा एष यदश्वो दद्धिरन्यतोदभ्यो भूयाँल्लोमभिरुभयाद्द्भ्यो यं द्विष्यात्तमधस्पदं ध्यायेद्वज्रेणैवैनग्ग् स्तृणुते॥[१०]

आह पापीयानुद्रादेव येनाऽग्रं वज्री वै सप्तदश च॥5.1.2॥

उत्क्रामोदक्रमीदिति द्वाभ्यामुत्क्रमयति प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पशवः प्र जायन्तेऽप उप सृजति यत्र वा आप उपगच्छन्ति तदोषधयः प्रति तिष्ठन्त्योषधीः प्रतितिष्ठन्तीः पशवोऽनु प्रति तिष्ठन्ति पशून् यज्ञो यज्ञं यजमानो यजमानं प्रजास्तस्मादप उप सृजति प्रतिष्ठित्यै यदध्वर्युरनग्नावाहुतिं जुहुयादन्धोऽध्वर्युः [११] स्याद्रक्षाग्ंसि यज्ञग्ं हन्युर्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञग्ं रक्षाग्ंसि घ्नन्ति जिघर्म्यग्निम्मनसा घृतेनेत्याह मनसा हि पुरुषो यज्ञमभिगच्छति प्रतिक्ष्यन्तं भुवनानि विश्वेत्याह सर्वग्ग् ह्येष प्रत्यङ्क्षेति पृथुं तिरश्चा वयसा बृहन्तमित्याहाल्पो ह्येष जातो महान् [१२] भवति व्यचिष्ठमन्नग्ं

रभसं विदानमित्याहाऽन्नमेवाऽस्मै स्वदयति सर्वमस्मै स्वदते य एवं वेदाऽऽ त्वा जिघर्मि वचसा घृतेनेत्याह तस्माद्यत्पुरुषो मनसाऽभिगच्छति तद्वाचा वदत्यरक्षसेत्याह रक्षसामपहत्यै मर्यश्रीः स्पृहयद्वर्णो अग्निरित्याहाऽपचितिमेवाऽस्मिन्दधात्यपचितिमान्भवति य एवं [१३] वेद मनसा त्वै तामाप्तुमर्हति यामध्वर्युरनग्नावाहुतिं जुहोति मनस्वतीभ्यां जुहोत्याहुत्योराप्त्यै द्वाभ्यां प्रतिष्ठित्यै यज्ञमुखेयज्ञमुखे वै क्रियमाणे यज्ञग्ं रक्षाग्ंसि जिघाग्ंसन्त्येतर्हि खलु वा एतद्यज्ञमुखं यर्ह्येनदाहुतिरश्नुते परि लिखति रक्षसामपहत्यै तिसृभिः परि लिखति त्रिवृद्वा अग्निर्यावानेवाऽग्निस्तस्माद्रक्षाग्स्यप हन्ति [१४] गायत्रिया परि लिखति तेजो वै गायत्री तेजसैवैनं परि गृह्णाति त्रिष्टुभा परि लिखतीन्द्रियं वै त्रिष्टुगिन्द्रियेणैवैनं परि गृह्णात्यनुष्टुभा परि लिखत्यनुष्टुप्सर्वाणि छन्दाग्ंसि परिभूः पर्याप्त्यै मध्यतोऽनुष्टुभा वाग्वा अनुष्टुप्तस्मान्मध्यतो वाचा वदामो गायत्रिया प्रथमया परि लिखत्यथाऽनुष्टुभाथ त्रिष्टुभा तेजो वै गायत्री यज्ञोऽनुष्टुगिन्द्रियं त्रिष्टुप्तेजसा चैवेन्द्रियेण चोभयतो यज्ञं परि गृह्णाति॥[१५]

*अन्थोऽध्वर्युर्महान्भवति य एवग्ं हन्ति त्रिष्टुभा तेजो वै गायत्री त्रयोदश च॥**5.1.3**॥*

देवस्य त्वा सवितुः प्रसव इति खनति प्रसूत्या अथो धूममेवैतेन जनयति ज्योतिष्मन्तं त्वाऽग्ने सुप्रतीकमित्याह ज्योतिरेवैतेन जनयति सोऽग्निर्जातः प्रजाः शुचाऽऽर्पयत्तं देवा अर्धर्चेनाऽशमयङ्छिवं प्रजाभ्योऽहिग्ंसन्तमित्याह प्रजाभ्य एवैनग्ं शमयति द्वाभ्यां खनति प्रतिष्ठित्या अपां पृष्ठमसीति पुष्करपर्णमा [१६] हरत्यपां वा एतत्पृष्ठं यत्पुष्करपर्णग्ं रूपेणैवैनदा हरति पुष्करपर्णेन सं भरति

योनिर्वा अग्नेः पुष्करपर्णग्ं सयोनिमेवाग्निग्ं सं भरति कृष्णाजिनेन सं भरति यज्ञो वै कृष्णाजिनं यज्ञेनैव यज्ञग्ं सं भरति यद्ग्राम्याणां पशूनां चर्मणा सम्भरेद्ग्राम्यान्पशूञ्छुचाऽर्पयेत्कृष्णाजिनेन सं भरत्यारण्यानेव पशून्- [१७] ञ्छुचाऽर्पयति तस्माथ्समावत्पशूनां प्रजायमानानामारण्याः पशवः कनीयाग्ंसः शुचा ह्यृता लोमतः सं भरत्यतो ह्यस्य मेध्यं कृष्णाजिनं च पुष्करपर्णं च सग्ग् स्तृणातीयं वै कृष्णाजिनमसौ पुष्करपर्णमाभ्यामेवैनमुभयतः परि गृह्णात्यग्निर्देवेभ्यो निलायत तमथर्वाऽन्वपश्यदथर्वा त्वा प्रथमो निरमन्थदग्न इत्या- [१८] ह य एवैनमन्वपश्यत्तेनैवैनग्ं सं भरति त्वामग्ने पुष्करादधीत्याह पुष्करपर्णे ह्येनमुपश्रितमविन्दत्तमु त्वा दध्य ङ्ऋषिरित्याह दध्यङ्ह्वा आथर्वणस्तेजस्व्यासीत्तेज एवाऽस्मिन्दधाति तमु त्वा पाथ्यो वृषेत्याह पूर्वमेवोदितमुत्तरेणाऽभि गृह्णाति [१९] चतसृभिः सं भरति चत्वारि छन्दाग्ंसि छन्दोभिरेव गायत्रीभिर्ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुग्भी राजन्यस्य त्रैष्टुभो हि राजन्यो यं कामयेत वसीयान्थ्स्यादित्युभयीभिस्तस्य सं भरेत्तेजश्चैवाऽस्मा इन्द्रियं च समीची दधात्यष्टाभिः सं भरत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाऽग्निस्तग्ं सं भरति सीद होतरित्याह देवता एवाऽस्मै सग्ं सादयति नि होतेति मनुष्यान्थ्सग्ं सीदस्वेति वयाग्ं सिजनिष्वा हि जेन्यो अग्रे अह्नामित्याह देवमनुष्यानेवाऽस्मै सग्ंसन्नान्प्र जनयति॥[२०]

ऐव पशूनिति गृणाति होतरिति सप्तविग्ंशतिश्च॥5.1.4॥

क्रूरमिव वा अस्या एतत्करोति यत्खनत्यप उप सृजत्यापो वै शान्ताः

शान्ताभिरेवाऽस्यै शुचग्ं शमयति सं ते वायुर्मातरिश्वा दधात्वित्याह प्राणो वै वायुः प्राणेनैवाऽस्यै प्राणग्ं सं दधाति सं ते वायुरित्याह तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते तस्मै च देवि वषडस्तु [२१] तुभ्यमित्याह षड्वा ऋतव ऋतुष्वेव वृष्टिं दधाति तस्माथ्सर्वानृतून्वर्षति यद्वषट्कुर्याद्यातयामाऽस्य वषट्कारः स्याद्यन्न वषट्कुर्याद्रक्षाग्ंसि यज्ञग्ं हन्युर्वडित्याह परोऽक्षमेव वषट्करोति नाऽस्य यातयामा वषट्कारो भवति न यज्ञग्ं रक्षाग्ंसि घ्नन्ति सुजातो ज्योतिषा सहेत्यनुष्टुभोप नह्यत्यनुष्टु- [२२] प्सर्वाणि छन्दाग्ंसि छन्दाग्ंसि खलु वा अग्नेः प्रिया तनूः प्रिययैवैनं तनुवा परि दधाति वेदुको वासो भवति य एवं वेद वारुणो वा अग्निरुपनद्ध उदु तिष्ठ स्वध्वरोर्ध्व ऊ षु ण ऊतय इति सावित्रीभ्यामुत्तिष्ठति सवितृप्रसूत एवाऽस्योर्ध्वां वरुणमेनिमुथ्सृजति द्वाभ्यां प्रतिष्ठित्यै स जातो गर्भो असि [२३] रोदस्योरित्याहेमे वै रोदसी तयोरेष गर्भो यदग्निस्तस्मादेवमाहाग्ने चारुर्विभृत ओषधीष्वित्याह यदा ह्येतं विभरन्त्यथ चारुतरो भवति प्र मातृभ्यो अधि कनिक्रदद्गा इत्याहौषधयो वा अस्य मातरस्ताभ्य एवैनं प्र च्यावयति स्थिरो भव वीड्वङ्ग इति गर्दभ आ सादयति [२४] सन्नह्यत्येवैनमेतया स्थेम्ने गर्दभेन सं भरति तस्माद्गर्दभः पशूनां भारभारितमो गर्दभेन सं भरति तस्माद्गर्दभोऽप्यनालेशेऽत्यन्यान्पशून्मेद्यत्यन्नग्ग् ह्येनेनाऽर्कग्ं सं भरन्ति गर्दभेन सं भरति तस्माद्गर्दभो द्विरेताः सन्कनिष्ठं पशूनां प्र जायतेऽग्निर्ह्यस्य योनिं निर्दहति प्रजासु वा एष एतर्ह्यारूढः [२५] स ईश्वरः प्रजाः शुचा प्रदहः शिवो भव प्रजाभ्य इत्याह प्रजाभ्य एवैनग्ं शमयति मानुषीभ्यस्त्वमङ्गिर इत्याह मानव्यो हि प्रजा मा द्यावापृथिवी अभि शूशुचो माऽन्तरिक्षं मा वनस्पतीनित्याहैभ्य एवैनं लोकेभ्यः

शमयति प्रैतु वाजी कनिक्रददित्या हवाजी ह्येष नानदद्रासभः पत्वेत्या- [२६] ह रासभ इति ह्येतमृषयोऽवदन्भरन्नग्निं पुरीष्यमित्याहाऽग्निग्ग् ह्येष भरति मा पाद्यायुषः पुरेत्याहाऽऽयुरेवाऽस्मिन्दधाति तस्माद्गर्दभः सर्वमायुरेति तस्माद्गर्दभे पुराऽऽयुषः प्रमीते बिभ्यति वृषाऽग्निं वृषणं भरन्नित्याह वृषा ह्येष वृषाग्निरपां गर्भग्ं [२७] समुद्रियमित्याहापाऽग् ह्येष गर्भो यदग्निरग्न आ याहि वीतय इति वा इमौ लोकौ व्यैतामग्न आ याहि वीतय इति यदाहाऽनयोर्लोकयोर्वीत्यै प्रच्युतो वा एष आयतनादगतः प्रतिष्ठाग्ं स एतर्ह्यध्वर्युं च यजमानं च ध्यायत्यृतग्ं सत्यमित्याहेयं वा ऋतमसौ [२८] सत्यमनयोरेवैनं प्रति ष्ठापयति नाऽऽर्तिमार्छत्यध्वर्युर्न यजमानो वरुणो वा एष यजमानमभ्यैति यदग्निरुपनद्ध ओषधयः प्रति गृह्णीताऽग्निमेतमित्याह शान्त्यै व्यस्यन्विश्वा अमतीररातीरित्याह रक्षसामप हत्यै निषीदन्नो अप दुर्मतिग्ं हनदित्याह प्रतिष्ठित्या ओषधयः प्रति मोदध्व- [२९] म्मेनमित्याहौषधयो वा अग्नेर्भागधेयं ताभिरेवैनग्ं समर्धयति पुष्पावतीः सुपिप्पला इत्याह तस्मादोषधयः फलं गृह्णन्त्ययं वो गर्भ ऋत्वियः प्रत्नग्ं सधस्थमाऽसददित्याह याभ्य एवैनं प्रच्यावयति तास्वेवैनं प्रति ष्ठापयति द्वाभ्यामुपावहरति प्रतिष्ठित्यै॥[३०]

अन्त्वनुष्टुबसि सादयत्यारूढः पत्वेति गर्भमसौ मोदध्वं द्विचत्वारिग्ंशच्च॥5.1.5॥

वारुणो वा अग्निरुपनद्धो वि पाजसेति वि स्रग्ंसयति सवितृप्रसूत एवाऽस्य विषूचीं वरुणमेनिं वि सृजत्यप उप सृजत्यापो वै शान्ताः शान्ताभिरेवाऽस्य शुचग्ं शमयति तिसृभिरुप सृजति त्रिवृद्वा अग्निर्यावानेवाऽग्निस्तस्य शुचग्ं शमयति मित्रः सग्ंसृज्य पृथिवीमित्याह मित्रो वै शिवो देवानां तेनैवै- [३१] नग्ं सग्ं सृजति

शान्त्यै यद्ग्राम्याणां पात्राणां कपालैः सग्ंसृजेद्ग्राम्याणि पात्राणि शुचाऽर्पयेदर्मकपालैः सग्ं सृजत्येतानि वा अनुपजीवनीयानि तान्येव शुचाऽर्पयति शर्कराभिः सग्ं सृजति धृत्या अथो शान्त्वायाऽजलोमैः सग्ं सृजत्येषा वा अग्नेः प्रिया तनूर्यदजा प्रिययैवैनं तनुवा सग्ं सृजत्यथो तेजसा कृष्णाजिनस्य लोमभिः सग्ं [३२] सृजति यज्ञो वै कृष्णाजिनं यज्ञेनैव यज्ञग्ं सग्ं सृजति रुद्राः सम्भृत्य पृथिवीमित्याहैता वा एतं देवता अग्रे समभरन्ताभिरेवैनग्ं सं भरति मखस्य शिरोऽसीत्याह यज्ञो वै मखस्तस्यैतच्छिरो यदुखा तस्मादेवमाह यज्ञस्य पदे स्थ इत्याह यज्ञस्य ह्येते [३३] पदे अथो प्रतिष्ठित्यै प्राऽन्याभिर्यच्छत्यन्वन्यैर्मन्त्रयते मिथुनत्वाय त्र्युद्धिं करोति त्रय इमे लोका एषां लोकानामाप्त्यै छन्दोभिः करोति वीर्यं वै छन्दाग्ंसि वीर्येणैवैनां करोति यजुषा बिलं करोति व्यावृत्त्या इयतीं करोति प्रजापतिना यज्ञमुखेन सम्मितां द्विस्तनां करोति द्यावापृथिव्योर्दोहाय चतुःस्तनां करोति पशूनां दोहायाऽष्टास्तनां करोति छन्दसां दोहाय नवाश्रिमभिचरतः कुर्यात्त्रिवृतमेव वज्रग्ं सम्भृत्य भ्रातृव्याय प्र हरति स्तृत्यै कृत्वाय सा महीमुखामिति नि दधाति देवतास्वेवैनां प्रति ष्ठापयति॥[३४]

तेनैव लोमभिस्समेते अभिचरत एकविग्ंशतिश्च॥5.1.6॥

सप्तभिर्धूपयति सप्त वै शीर्ष्ण्याः प्राणाः शिर एतद्यज्ञस्य यदुखा शीर्ष्णन्नेव यज्ञस्य प्राणान्दधाति तस्माथ्सप्त शीर्ष्णन्प्राणा अश्वशकेन धूपयति प्राजापत्यो वा अश्वः सयोनित्वायाऽदितिस्त्वेत्याहेयं वा अदितिरदित्यैवाऽदित्यां खनत्यस्या अक्रूरङ्काराय न हि स्वः स्वग्ं हिनस्ति देवानां त्वा पत्नीरित्याह देवानां [३५] वा एतां

पत्नयोऽग्रेऽकुर्वन्ताभिरेवैनां दधाति धिषणास्त्वेत्याह विद्या वै धिषणा विद्याभिरेवैनामभीन्धे ग्नास्त्वेत्याह छन्दाग्ंसि वै ग्नाश्छन्दोभिरेवैनाग् श्रपयति वरूत्रयस्त्वेत्याह होत्रा वै वरूत्रयो होत्राभिरेवैनां पचति जनयस्त्वेत्याह देवानां वै पत्नी [३६] र्जनयस्ताभिरेवैनां पचति षड्भिः पचति षड्वा ऋतव ऋतुभिरेवैनां पचति द्विः पचन्त्वित्याह तस्माद् द्विः संवथ्सरस्य सस्यं पच्यते वारुण्युखाऽभीद्धा मैत्रियोपैति शान्त्यै देवस्त्वा सवितोद्वपत्वित्याह सवितृप्रसूत एवैनां ब्रह्मणा देवताभिरुद्वपत्यपद्यमाना पृथिव्याशा दिश आ पृणे– [३७] त्याह तस्मादग्निः सर्वा दिशोऽनु वि भात्युत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वमित्याह प्रतिष्ठित्या असुर्यं पात्रमनाच्छृण्णमा छृणत्ति देवत्राऽकरजक्षीरेणाऽऽ च्छृणत्ति परमं वा एतत्पयो यदजक्षीरं परमेणैवैनां पयसाऽऽ च्छृणत्ति यजुषा व्यावृत्त्यै छन्दोभिरा च्छृणत्ति छन्दोभिर्वा एषा क्रियते छन्दोभिरेव छन्दाग्ग्स्या छृणत्ति॥[३८]

आह देवानां वै पत्नीः पृणैषा षट्च॥5.1.7॥

एकविग्ंशत्या माषैः पुरुषशीर्षमच्छैत्यमेध्या वै माषा अमेध्यं पुरुषशीर्षममेध्यैरेवाऽस्यामेध्यं निरवदाय मेध्यं कृत्वाऽऽ हरत्येकविग्ंशतिर्भवन्त्येकविग्ंशो वै पुरुषः पुरुषस्याऽऽप्त्यै व्यृद्धं वा एतत्प्राणैरमेध्यं यत्पुरुषशीर्षग्ं सप्तधा वितृण्णां वल्मीकवपां प्रति नि दधाति सप्त वै शीर्षण्याः प्राणाः प्राणैरेवैनथ्समर्धयति मेध्यत्वाय यावन्तो [३९] वै मृत्युबन्धवस्तेषां यम आधिपत्यं परीयाय यमगाथाभिः परि गायति यमादेवैनद्वृङ्क्ते तिसृभिः परि गायति त्रय इमे लोका एभ्य एवैनल्लोकेभ्यो वृङ्क्ते तस्माद्गायते न देयं

गाथा हि तद्वृङ्क्तेऽग्निभ्यः पशूना लभते कामा वा अग्नयः कामानेवाऽव रुन्धेयत्पशून्नाऽऽलभेताऽनवरुद्धा अस्य [४०] पशवः स्युर्यत्पर्यग्निकृतानुथ्सृजेद्यज्ञवेशसं कुर्याद्यथ्सग्ग्स्थापयेद्यातयामानि शीर्षाणि स्युर्यत्पशूनालभते तेनैव पशूनव रुन्धे यत्पर्यग्निकृतानुथ्सृजति शीर्ष्णामयातयामत्वाय प्राजापत्येन सग्ग् स्थापयति यज्ञो वै प्रजापतिर्यज्ञ एव यज्ञं प्रति ष्ठापयति प्रजापतिः प्रजा असृजत स रिरिचानोऽमन्यत स एता आप्रीरपश्यत्ताभिर्वै स मुखत [४१] आत्मानमाऽप्रीणीत यदेता आप्रियो भवन्ति यज्ञो वै प्रजापतिर्यज्ञमेवैताभिर्मुखत आ प्रीणात्यपरिमितछन्दसो भवन्त्यपरिमितः प्रजापतिः प्रजापतेराप्त्या ऊनातिरिक्ता मिथुनाः प्रजात्यै लोमशं वै नामैतच्छन्दः प्रजापतेः पशवो लोमशाः पशूनेवाऽव रुन्धे सर्वाणि वा एता रूपाणि सर्वाणि रूपाण्यग्नौ चित्ये क्रियन्ते तस्मादेता अग्नेश्चित्यस्य [४२] भवन्त्येकविग्ंशतिग्ं सामिधेनीरन्वाह रुग्वा एकविग्ंशो रुचमेव गच्छत्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकविग्ंशश्चतुर्विग्ंशतिमन्वाह चतुर्विग्ंशतिरर्धमासाः संवथ्सरः संवथ्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुन्धे पराचीरन्वा हपरा ङिव हि सुवर्गो लोकः समास्त्वाऽग्न ऋतवो वर्धयन्त्वित्याह समाभिरेवाऽग्निं वर्धय [४३] त्यृतुभिः संवथ्सरं विश्वा आ भाहि प्रदिशः पृथिव्या इत्याह तस्मादग्निः सर्वा दिशोऽनु वि भाति प्रत्यौहतामश्विना मृत्युमस्मादित्याह मृत्युमेवाऽस्मादप नुदत्युद्वयं तमसस्परीत्याह पाप्मा वै तमः पाप्मानमेवाऽस्मादप हन्त्यगन्म ज्योतिरुत्तममित्याहाऽसौ वा आदित्यो ज्योतिरुत्तममादित्यस्यैव सायुज्यं गच्छति न संवथ्सरस्तिष्ठति नाऽस्य श्रीस्तिष्ठति यस्यैताः क्रियन्ते ज्योतिष्मतीमुत्तमामन्वाह

ज्योतिरेवाऽस्मा उपरिष्टाद्दधाति सुवर्गस्य लोकस्यानुऽख्यात्यै॥[४४]

यावन्तोऽस्य मुखतश्चित्यस्य वर्धयत्यादित्योऽष्टाविग्ं शतिश्च॥5.1.8॥

षड्भिर्दीक्षयति षड्वा ऋतव ऋतुभिरेवैनं दीक्षयति सप्त भिर्दीक्षयति सप्तछन्दाग्ंसि छन्दोभिरेवैनं दीक्षयति विश्वे देवस्य नेतुरित्यनुष्टुभोत्तमया जुहोति वाग्वा अनुष्टुप्तस्मात्प्राणानां वागुत्तमैकस्मादक्षरादनाप्तं प्रथमं पदं तस्माद्यद्वाचोऽनाप्तं तन्मनुष्या उप जीवन्ति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः [४५] प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाग्ं सृष्ट्यै यदर्चिषि प्रवृञ्ज्याद्भूतमव रुन्धीत यदङ्गारेषु भविष्यदङ्गारेषु प्र वृणक्ति भविष्यदेवाव रुन्धे भविष्यद्धि भूयो भूताद्द्वाभ्यां प्र वृणक्ति द्विपाद्यजमानः प्रतिष्ठित्यै ब्रह्मणा वा एषा यजुषा सम्भृता यदुखा सा यद्भिद्येताऽऽर्तिमार्छे- [४६] द्यजमानो हन्येताऽस्य यज्ञो मित्रैतामुखां तपेत्याह ब्रह्म वै मित्रो ब्रह्मन्नेवैनां प्रति ष्ठापयति नाऽऽर्तिमार्छति यजमानो नाऽस्य यज्ञो हन्यते यदि भिद्येत तैरेव कपालैः सग्ंसृजेथ्सैव ततः प्रायश्चित्तिर्यो गतश्रीः स्यान्मथित्वा तस्याऽव दध्याद्भूतो वा एष स स्वां [४७] देवतामुपैति यो भूतिकामः स्याद्य उखायै सं भवेथ्स एव तस्य स्यादतो ह्येष सं भवत्येष वै स्वयम्भूर्नाम भवत्येव यं कामयेत भ्रातृव्यमस्मै जनयेयमित्यन्यतस्तस्याऽऽहृत्याऽव दध्याथ्साक्षादेवाऽस्मै भ्रातृव्यं जनयत्यम्बरीषादन्नकामस्याऽव दध्यादम्बरीषे वा अन्नम्भ्रियते सयोन्येवाऽऽन्न- [४८] मव रुन्धे मुञ्जानव दधात्यूर्ग्वै मुञ्जा ऊर्जमेवाऽस्मा अपि दधात्यग्निर्देवेभ्यो निलायत स क्रुमुकं प्राविशत्क्रुमुकमव दधाति यदेवाऽस्य तत्र न्यक्तं तदेवाऽव रुन्ध

आज्येन सं यौत्येतद्वा अग्नेः प्रियं धाम यदाज्यं प्रियेणैवैनं धाम्ना समर्धयत्यथो तेजसा [४९] वैकङ्कतीमा दधाति भा एवाऽव रुन्धे शमीमयीमा दधाति शान्त्यै सीद त्वम्मातुरस्या उपस्थ इति तिसृभिर्जातमुप तिष्ठते त्रय इमे लोका एष्वेव लोकेष्वाविदं गच्छत्यथो प्राणानेवाऽऽत्मन्धत्ते॥[५०]

प्रजापतिर् ऋच्छेथ्स्वामेवाऽन्नं तेजसा चतुस्त्रिग्ंशच्च॥5.1.9॥

न ह स्म वै पुराऽग्निरपरशुवृक्णं दहति तदस्मै प्रयोग एवर्षिरस्वदयद्यदग्ने यानि कानि चेति समिधमा दधात्यपरशुवृक्णमेवाऽस्मै स्वदयति सर्वमस्मै स्वदते य एवं वेदौदुम्बरीमा दधात्यूर्ग्वा उदुम्बर ऊर्जमेवाऽस्मा अपि दधाति प्रजापतिरग्निमसृजत तग्ं सृष्टग्ं रक्षाग्स्य- [५१] जिघाग्ंसन्थ्स एतद्राक्षोघ्नमपश्यत्तेन वै स रक्षाग्स्यपाहत यद्राक्षोघ्नम्भवत्यग्नेरेव तेन जातादृक्षाग्स्यप हन्त्याश्वत्थीमा दधात्यश्वत्थो वै वनस्पतीनाग्ं सपत्नसाहो विजित्यै वैकङ्कतीमा दधाति भा एवाऽव रुन्धे शमीमयीमा दधाति शान्त्यै सग्ंशितं मे ब्रह्मोदेषां बाहू अतिरमित्युत्तमे औदुम्बरी [५२] वाचयति ब्रह्मणैव क्षत्रग्ं सग्ग् श्यति क्षत्रेण ब्रह्म तस्माद्ब्राह्मणो राजन्यवानत्यन्यं ब्राह्मणं तस्माद्राजन्यो ब्राह्मणवानत्यन्यग्ं राजन्यं मृत्युर्वा एष यदग्निरमृतग्ं हिरण्यग्ं रुक्ममन्तरं प्रति मुञ्चतेऽमृतमेव मृत्योरन्तर्धत्त एकविग्ंशतिनिर्बाधो भवत्येकविग्ंशतिर्वै देवलोका द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य [५३] एकविग्ंश एतावन्तो वै देवलोकास्तेभ्य एव भ्रातृव्यमन्तरेति निर्बाधैर्वै देवा असुरान्निर्बाधेऽकुर्वत तन्निर्बाधानां निर्बाधत्वं निर्बाधी भवति भ्रातृव्यानेव निर्बाधे कुरुते सावित्रिया प्रति मुञ्चते प्रसूत्यै

नक्तोषासेत्युत्तरयाऽहोरात्राभ्यामेवैनमुद्यच्छते देवा अग्निं धारयन्द्रविणोदा इत्याह प्राणा वै देवा द्रविणोदा अहोरात्राभ्यामेवैनमुद्यत्य [५४] प्राणैर्दाधाराऽऽसीनः प्रति मुञ्चते तस्मादासीनाः प्रजाः प्र जायन्ते कृष्णाजिनमुत्तरं तेजो वै हिरण्यं ब्रह्म कृष्णाजिनं तेजसा चैवैनं ब्रह्मणा चोभयतः परि गृह्णाति षडुद्यामग्ं शिक्यं भवति षड्वा ऋतव ऋतुभिरेवैनमुद्यच्छते यद्द्वादशोद्यामग्ं संवथ्सरेणैव मौञ्जम्भवत्यूर्ग्वै मुञ्जा ऊर्जैवैनग्ं समर्धयति सुपर्णोऽसि गरुत्मानित्यवेक्षते रूपमेवाऽस्यैतन्महिमानं व्याचष्टे दिवं गच्छ सुवः पतेत्याह सुवर्गमेवैनंलोकं गमयति॥[५५]

रक्षाग् स्यौदुम्बरी आदित्य उद्यत्य सं चतुर्विग्ंशतिश्च॥5.1.10॥

समिद्धो अञ्जन्कृदरम्मतीनां घृतमग्ने मधुमत्पिन्वमानः। वाजी वहन्वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम्॥ घृतेनाऽञ्जन्थ्सं पथो देवयानान्प्रजानन्वाज्यप्येतु देवान्। अनु त्वा सप्ते प्रदिशः सचन्ताग् स्वधामस्मै यजमानाय धेहि॥ ईड्यश्चाऽसि वन्द्यश्च वाजिन्नाशुश्चाऽसि मेध्यश्च सप्ते। अग्निष्ट्वा [५६] देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः॥ स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम्। देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु॥ एता उ वः सुभगा विश्वरूपा वि पक्षोभिः श्रयमाणा उदातैः। ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु॥ अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने। उषासा वाग्ं [५७] सुहिरण्ये सुशिल्पे ऋतस्य योनाविह सादयामि॥ प्रथमा वाग्ं सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा। अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता॥ आदित्यैर्नो भारती वष्टु यज्ञग्ं सरस्वती सह रुद्रैर्न

आवीत्। इडोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त॥ त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः।[५८] त्वष्टेदं विश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः॥ अश्वो घृतेन त्मन्या समक्त उप देवाग्ं ऋतुशः पाथ एतु। वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत्॥ प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने। स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः॥[५९]

अग्निष्ट्वा वामश्वो द्विचत्वारिग्ंशच्च॥5.1.11॥

सावित्राणि व्यृद्धमुत्क्राम देवस्य खनति क्रूरं वारुणस्सप्तभिदेकविग्ंशत्या षड्भिर्न ह स्म समिद्धो अज्जन्नेकादश॥11॥

सावित्राण्युत्क्राम क्रूरं वारुणः पशवस्स्युर्न ह स्म नवपञ्चाशत्॥५९॥

सावित्राणि हविरदन्तु देवाः॥

॥ हरिः ओम्॥

॥ श्री कृष्णार्पणमस्तु॥

॥ इति पञ्चम काण्डे प्रथमः प्रश्नः॥